दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-108 | 1 | फरवरी 08, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णसप्तमी
माघ 26 प्रविष्टांशः मङ्गलमयः भवेत्

2 राष्ट्रपतिः द्रौपदी-मुर्मुः छत्तीसगढस्य जगदलपुरे 'बस्तर पाण्डुम्-2026' इति सांस्कृतिक-उत्सवस्य उद्घाटनम् अकरोत्
3 हि.प्र. राज्यपालस्य अभिभाषणेन सह १६ फरवरी दिनाङ्कतः आरप्स्यते विधानसभायाः बजट-सत्रम्
5 महात्मानारायणदासग्रोवर-महोदयस्य व्यक्तित्वं कृतित्वं च

## भारत-अमरीका-देशयोर्मध्ये अन्तरीम व्यापार-सन्धेः संरचना द्वयोः देशयोर्मध्ये वर्धमानं गहनं, विश्वासं, गतिशीलतां च प्रतिबिम्बयति - प्रधानमन्त्री नरेन्द्रमोदी।



**हिमसंस्कृतवार्ताः** - भारत-अमेरिका-देशौ अघोषयताम् यत् तौ परस्पर-लाभप्रद व्यापारस्य विषये अन्तरीम-सन्धेः प्रारूपं प्राप्तवन्तौ । वाणिज्योद्योग मन्त्रालयः भारत-अमेरिका-संयुक्त-वक्तव्यम् समुल्लेखयन् उक्तवान् यत् एतत् प्रारूपं विस्तृतस्य भारतामरीकयोः, द्विपाक्षिकव्यापाराय प्रतिबद्धतां पुनः दृढीकरोति । संयुक्त-वक्तव्यानुसारं, अमेरिका-देशः भारतीय-वस्तूनां उपरि अष्टादश प्रतिशतं पारस्परिक शुल्कं प्रवर्तयिष्यति। भारतं सर्वेषु अमेरिकीय-औद्योगिक वस्तूनां, अमेरिकीय-खाद्य-कृषि उत्पादानां च विस्तृत-श्रेण्याः शुल्कं निष्कासयिष्यति उत वा न्यूनीकर्तुं शक्नोति।

### नूतनान् अवसरान् उद्घाटयित्वा 'मेक् इन् इण्डिया' इत्येतं सुदृढं करोति - प्रधानमन्त्री।

प्रधानमन्त्री नरेन्द्रमोदी भारत-अमेरिका-देशयोर्मध्ये अन्तरीम-व्यापार-सन्धेः प्रारूपं महत्वपूर्णां वार्तां अमन्यत्, देशयोश्च मध्ये सुदृढसम्बन्धेषु व्यक्तिगतप्रतिबद्धतायै अमेरिका-देशस्य राष्ट्रपतये डोनाल्ड ट्रम्पाय सः धन्यवादान् वितरयन् सामाजिक-प्रसार माध्यमे अकथयत् यत् एषा संरचना भारत-अमेरिका-सहभागित्वस्य वर्धमानं गहनं, विश्वासं, गतिशीलतां च प्रतिबिम्बयतीति। श्रीमोदी अवदत् यत् एतत् भारतस्य परिश्रमिभ्यः कृषकेभ्यः, उद्यमीभ्यः नवोद्योगिभ्यः, मत्स्यजीवीभ्यश्च नूतनान् अवसरान् उद्घाटयित्वा 'मेक् इन् इण्डिया' इत्येतं सुदृढं करोति ।

### अन्तरीमसमन्वयस्य संरचना परस्परं लाभप्रदं भारत-अमेरिका-व्यापारसहभागित्वं साधयिष्यति - विदेशमन्त्री जयशङ्करः

विदेशमन्त्री डा. एस. जयशङ्करः अवदत् यत् अन्तरीमसमन्वयस्य संरचना परस्परं लाभप्रदं भारत-अमेरिका-व्यापारसहभागित्वं साधयिष्यति । सामाजिक-प्रसार माध्यमे डा. जयशङ्करः अवदत् यत् एषा संरचना भारतीय-निर्यातकेभ्यः इतोऽप्यधिक-विपणि-प्रवेशं, अवसराञ्च सुनिश्चितं करिष्यतीति। सः अवदत् यत् नूतनानि दृश्यानि उद्घाटितानि सन्ति यानि मेक् इन् इण्डिया इत्यस्य प्रोत्साहनं करिष्यन्ति।

### शिवराज-सिंह-चौहानः भारत-अमेरिका-व्यापार-अन्तरीम-व्यापार-सन्धेः प्रशंसाम् अकरोत्

कृषि कल्याण-मन्त्री शिवराज-सिंह-चौहानः भारत-अमेरिका-व्यापार-अन्तरीम-व्यापार-सन्धेः प्रशंसाम् अकरोत्, येन भारतीय-कृषकाणां पूर्णसंरक्षणं भवतीति च उक्तवान्।

### व्यापार-आर्थिकसहयोगविषये भारत-अमेरिका-देशयोः संयुक्त-वक्तव्यम् राष्ट्रपतिना डोनाल्ड ट्रम्पेन प्रधानमन्त्रिणा नरेन्द्रमोदिना च प्रशंसितम्- सर्जियो गोरः

अमरीका-देशस्य राजदूतः सर्जियो गोर इत्यनेन उक्तं यत् व्यापार-आर्थिकसहयोगविषये भारत-अमेरिका-देशयोः संयुक्त-वक्तव्यम् राष्ट्रपतिना डोनाल्ड ट्रम्पेन प्रधानमन्त्रिणा नरेन्द्रमोदिना च प्रशंसितम्। सामाजिक-प्रसार-माध्यमे एक्स इत्यत्र एकस्मिन् सन्देशे, सः संयुक्त-वक्तव्यं साधयितुं द्वयोः नेत्रोः नेतृत्वम्, दूरदृष्टिश्च अङ्गीकृतवान् तथा च द्विपाक्षिक सम्बन्धेषु नूतनं चरणम् इति अवोचत्।

## भारत-अमरीका-अन्तरीम-व्यापार-सन्धेः अन्तर्गतं पञ्चाशत प्रतिशतं पारस्परिक शुल्कं अधुना अष्टादश प्रतिशतं यावत् न्यूनीकृतम् - गोयलः

**हिमसंस्कृतवार्ताः** - वाणिज्योद्योग-मन्त्री पीयूषगोयलः अवदत् यत् भारतीय-निर्यातृभ्यः भारत-अमरीका-अन्तरीम-व्यापार-सन्धेः अन्तर्गतं पञ्चाशत प्रतिशतं पारस्परिक शुल्कं अधुना अष्टादश प्रतिशतं यावत् न्यूनीकृतम् अस्ति इति। नवदेहली-नगरे भारत-अमेरिका-संयुक्त-वक्तव्यस्य विषये प्रसारमाध्यमान् सम्बोधयन् श्री गोयल्-वर्यः अवदत् यत् चीन, पाकिस्तान, बाङ्ग्लादेशः, वियतनाम् इत्यादीनां प्रतिवेशिनां देशानाम् अपेक्षया भारतस्य शुल्कं न्यूनम् अस्ति इति। श्रीगोयलवर्यः अधोरेखितवान् यत् अयं व्यवहारः देशस्य कृषिक्षेत्रस्य, दुग्धक्षेत्रस्य च रक्षणं करोति।

## इस्लामाबाद्-नगरस्य मस्जिद-विस्फोटस्य भारतेन निन्दा कृता; उक्तञ्च पाकिस्तानदेशः अन्येषु दोषारोपयन् स्वयं भ्रान्तौ स्थातुमिच्छति



**हिमसंस्कृतवार्ताः** - इस्लामिक्-स्टेट्स इति नाम्ना कुख्यातः आई. एस. इत्युपनामकः समूहः पाकिस्तानस्य राजधान्यां इस्लामाबाद-नगरे एकस्मिन् मस्जिद-मध्ये कृतस्य आत्मघाती विस्फोटस्य दायित्वं स्वीकारम् अकरोत्, यस्मिन् शुक्रवासरे नमाज़काले न्यूनातिन्यूनं षट्त्रिंशज्जनाः मृताः, सप्तत्युत्तरैकशत जनाश्च व्रणिताः अभवन्। इस्लामिक् स्टेट् इत्ययं स्वस्य टेलिग्राम्-वाहिन्यां प्रसारिते एकस्मिन् वक्तव्ये अस्य आक्रमणस्य दायित्वं स्वयकरोत्। भयोत्पादकसमूहः एकं चित्रम् अपि प्रकाशितवान् यस्मिन् आक्रमणकारी सैफुल्ला अन्सारी भुशुण्डीं धारयन्, मुखमाच्छाय, तर्जयन् दृश्यते। भारतदेशेन च अस्याम् दुर्घटनायाम् शोकः प्रकटितः, उक्तञ्च पाकिस्तानदेशः अन्येषु दोषारोपयन् स्वयं भ्रान्तौ स्थातुमिच्छति ।

## देहल्यां प्रचलति प्लास्टिकप्रदर्शनेषु अन्यतमः PlastIndia 2026

विश्वस्य बृहत्तमेषु प्लास्टिकप्रदर्शनेषु अन्यतमः PlastIndia 2026 इति नूतनदिल्लीनगरे प्रचलति। षड्दिवसीयः कार्यक्रमः विनिर्माणनेतृत्वेन वृद्धिं बृहत्परिमाणे रोजगारं च प्रवर्धयितुं स्वनिर्भरौद्योगिकाधारस्य निर्माणे केन्द्रितः अस्ति। प्रदर्शनी युवानां, नवीनकारानाम्, स्टार्टअप-संस्थानां च कृते स्थायि-प्लास्टिक-समाधानस्य अन्वेषणार्थं मञ्चं प्रदाति । एक्सोन्मोबिल् इत्यस्य वाणिज्यिकब्राण्ड् मार्केटिंग् निदेशिका ज़िउहुआन् सु इत्यस्याः कम्पनी अस्मिन् कार्यक्रमे रसायनानि स्नेहनसमाधानं च प्रदर्शयति इति अवदत्।

## सुभाषितम्

**उपभोगः कातराणां, पुरुषाणामर्थसंचयपराणाम्।**
**कन्यामणिरिव सदने, तिष्ठत्यर्थः परस्यार्थे।।**

भावार्थः- अपने परिश्रम से संपत्ति अर्जित करने में कुशल परन्तु उसका उपभोग न वाले व्यक्तियों की संपत्ति उनके घर में उनकी एक मणि के समान मूल्यवान और सुन्दर कन्या के समान रहती है, जो अन्ततः किसी दूसरे के घर में चली जाएगी।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## प्रधानमन्त्री द्विदिवसीय-आधिकारिक-यात्रायाम् मलेशिया-देशे अस्ति




**हिमसंस्कृतवार्ताः** - विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् भारतस्य मलेशियादेशेन सह व्यापकः रणनीतिकः-सम्बन्धः अस्ति, यस्य मूलानि ऐतिहासिकैः सांस्कृतिकैश्च सम्बन्धैः सह निहितानि सन्ति । प्रधानमन्त्रिणः नरेन्द्रमोदिनः मलेशियादेशस्य यात्रायाः विषये जायसवालः अवदत् यत् अस्यां यात्रावधौ विविधाः समृद्धाः कार्यक्रमाः आयोज्यन्ते। सः अवदत् यत् एषा यात्रा उभयोः देशयोः मध्ये पारस्परिकान् संबंधान् अपि सुदृढीकरिष्यति।

# मुख्यमंत्रीः सुखविन्द्रसिंहः सुक्खुः विधायकैः सह स्व-प्राथमिकतासु विचारविमर्शं कृतवान्-



हिमसंस्कृतवार्ताः- शिमला।मुख्यमंत्रीः सुखविन्द्रसिंहः सुक्खूः शनिवासरे वित्तवर्षे २०२६–२७ कृते विधायकिनां प्राथमिकता- उपवेशनस्य द्वितीयदिने प्रथमसत्रे कुल्लू- मण्डी- शिमला- जनपदानां विधायकेन सह तेषां प्राथमिकतासु विस्तृतं विचार-विमर्शं कृतवान्। मुख्यमंत्रीः अवदत् यत् वर्तमान- सर्वकारेण गत-त्रिषु वर्षेषु स्वसंसाधनैः २६,६८३ कोटि-रूप्यकाणां राजस्वम् अर्जितम् अस्ति। तेनोक्तं यत् वाइल्ड- फ्लावर- हॉल- होटलस्य स्वामित्वात् राज्याय प्रायः ४०१ कोटि-रूप्यकाणां वित्तीयलाभः प्राप्तः अस्ति, तथा प्रतिवर्षं २० कोटि-रूप्यकाणां आयः भविष्यति इति अनुमानः अस्ति।

तेन अवदत् यत् राज्य-सर्वकारस्य प्रयत्नैः कडछम-वाङ्गतू जलविद्युत्-परियोजनायां राज्याय प्राप्य-रॉयल्टी १२ प्रतिशततः १८ प्रतिशतं पर्यन्तं वर्धिता, येन राज्याय प्रतिवर्षं प्रायः १५० कोटि-रूप्यकाणाम् अतिरिक्त-आयः भविष्यति। मुख्यमंत्रीः उक्तवान् यत् पञ्चदश-वित्त-आयोगेन हिमाचल-प्रदेशाय राजस्व-हानि-अनुदानरूपेण ३७,१९९ कोटि-रूप्यकाणि प्रदत्तानि, सा च राशि क्षीयमाण-अनुपातेन प्रदत्ता।तेनोक्तं यत् २०२१–२२ वित्तवर्षे १०,२४९ कोटि, २०२२–२३ वित्तवर्षे ९,३७७ कोटि, २०२३–२४ वित्तवर्षे ८,०५७ कोटि, २०२४–२५ वित्तवर्षे ६,२४९ कोटि, २०२५–२६ वित्तवर्षे ३,२५७ कोटि- रूप्यकाणि राजस्वहानि-अनुदानरूपेण प्राप्तानि। षोडश- वित्त-आयोगेन एतस्य अनुदानस्य समापनात् राज्याय प्रायः ५० सहस्र- कोटि- रूप्यकाणां हानिः भविष्यति इति सः अवदत्।तेनोक्तं यत् हिमाचल-सदृशे पर्वतीय- दुर्गम- भौगोलिक- परिस्थितियुक्ते राज्ये राजस्व- हानि- अनुदानस्य समापनम् अन्यायपूर्णम् अस्ति। केन्द्र- सर्वकारस्य एतेन निर्णयेन राज्यस्य विकासयोजनाः, कल्याणकारीकार्यक्रमाः, वेतन- पेन्शनादयश्च प्रभाविताः भविष्यन्ति इति तस्य आशङ्का अस्ति। अतः सः केन्द्र-सर्वकारं हिमाचलस्य विशेष- परिस्थितीन् दृष्ट्वा राजस्व- हानि- अनुदानस्य पुनर्स्थापनां, विशेष- आर्थिक-सहायतां च याचितवान्।मुख्यमंत्री अवदत् यत् सीमावर्ती-पर्यटनस्य संवर्धनार्थं भारत-चीन-सीमायां शिपकीला-द्वारे सीमापर्यटन-गतिविधयः आरब्धाः। केन्द्रीय-बजटे २०२६–२७ पूर्वोत्तर-राज्यानां कृते बौद्ध-परिपथस्य घोषणा कृता, किन्तु बौद्ध-संस्कृतेः महत्त्वपूर्ण-केंद्ररूपेण स्थितस्य हिमाचलस्य बौद्ध-परिपथस्य वर्जनं भेदभावपूर्णम् इति सः अवदत्। विश्वप्रसिद्ध- पर्यटनस्थलानां सत्त्वेऽपि पर्यटन-विकासाय बजटे विशेष-योजना-प्रावधानस्य अभावः इति सः उक्तवान्।

**कुल्लू-जनपदस्य प्राथमिकताः** मनाली-विधायकः भुवनेश्वर-गौड़ः अवदत् यत् आरडीजी-समापनं प्रदेशाय हितकरं नास्ति, अतः सर्वैः मिलित्वा केन्द्र-सर्वकारे तस्य पुनर्बहालीं प्रति आग्रहः कर्तव्यः। तेन मनाल्याम् आइस- स्केटिङ- रिङ्कनिर्माणं, वाम-तटमार्गस्य सुदृढीकरणं, पर्यटन- ऋतौ पुलिसकर्मिणां संख्यावृद्धिं, हिम- अपसारणाय लघु-यन्त्र-प्रदानं च याचितम्।कुल्लूविधायकः सुन्दरसिंहठाकुरः कुल्लू- विमानपत्तन-विस्तारं, हेली-टैक्सी-सेवाया आरम्भाय मुख्यमन्त्रिणः आभारं च व्यक्तवान्। तेन प्रधानमंत्री- ग्राम- सड़क- योजनान्तर्गत- मार्गनिर्माणस्य शीघ्रसमापनं, मणिकर्णस्य वैकल्पिकमार्गनिर्माणं, कुल्लू- माता- शिशु- चिकित्सालये कर्मिणां वृद्धिं च याचितम्।बंजार-विधायकः सुरेन्द्र शौरीः मार्ग-व्यवस्थाया दृढीकरणं, विद्युत्-समस्याया निवारणाय बजौरा- उपकेंद्र- सुदृढीकरणम्, औट-लुहरी-मार्ग-सुधारं, लार्जीस्थाने जलक्रीडारम्भं च याचितवान्।आनी- विधायकः लोकेन्द्रकुमारः आनी- आदर्श-स्वास्थ्यसंस्थायां सुविधावृद्धिं, चिट्टा- माफिया- विरुद्धं कठोरकार्रवाहीं, यातायात-व्यवस्थायां सुधारं, बागवानानां हिताय एण्टी- हेल- गन- स्थापनं च याचितवान्।

## राष्ट्रपतिः द्रौपदी-मुर्मुः छत्तीसगढस्य जगदलपुरे 'बस्तर पाण्डुम्-2026' इति सांस्कृतिक-उत्सवस्य उद्घाटनम् अकरोत्



**हिमसंस्कृतवार्ताः** - राष्ट्रपतिपदासीना द्रौपदीमुर्मुः छत्तीसगढराज्यस्य बस्तरमण्डले आयोजिते "बस्तर पण्डुम" महोत्सवे समारोहम् उद्घाटयन्ती अवदत् यत् बस्तरप्रदेशस्य जनाः जीवनं उत्सवरूपेण यापयन्ति। सा उक्तवती यत् बस्तर-पण्डुम-महोत्सवेन देशः विश्वश्च बस्तरप्रदेशस्य समृद्धां आदिवासी-संस्कृतिं अवलोकयितुं शक्नोति।

### बस्तरप्रदेशः गतचत्वारिंशत् वर्षेभ्यः माओवादिनां आतंकि-समस्यया पीडितः आसीत् - राष्ट्रपतिः

राष्ट्रपतिः उक्तवती यत् बस्तरप्रदेशः गतचत्वारिंशत् वर्षेभ्यः माओवादिनां आतंकि-समस्यया पीडितः आसीत्। येन आदिवासीसमुदायः, युवजनाः, दलितवर्गाश्च अत्यधिकतया प्रभाविताः अभवन्। सा अवदत् यत् माओवादीहिंसां विरुध्य केन्द्रसर्वकारेण कृतेन निर्णायककार्याचरणेन अस्मिन् क्षेत्रे दीर्घकालात् विद्यमानं भयम्, असुरक्षा, अविश्वासश्च शनैः शनैः समाप्तं जायते। अस्मिन् उद्घाटनसमारोहे छत्तीसगढस्य राज्यपालः रमन डेका, मुख्यमन्त्री विष्णुदेवसाई, केन्द्रीयराज्यमन्त्री तोखन साहू च उपस्थिताः आसन्।

**मण्डी-जनपदस्य प्राथमिकताः** करसोगविधायकः दीपराजः करसोग-आइटीआई तथा पॉलिटेक्निक-भवनविषयं, बससेवावृद्धिं, मार्ग-निर्माण-त्वरणं च अवदत्। सुन्दरनगरविधायकः राकेश जम्वालः सीएचसी- निहरी तथा पीएचसी-बलग-भवन-निर्माण-त्वरणं, सतलुज-जल-उत्थापनं, डैहर-जल-व्यवस्था, सीवरेज-सुधारं, आइटीआई डैहर-भवनं, इण्डोर- स्टेडियम-निर्माणं च याचितवान्। नाचन-विधायकः विनोदकुमारः आपदा- प्रभावित-फुटओवर-ब्रिजनिर्माणं, इण्डोर- स्टेडियम- कार्यसमापनं, चैलचौक-पण्डोहमार्गस्य सीआरआईएफ-अन्तर्गत-स्वीकृतिं याचितवान्।द्रंगविधायकः पूर्णसिंहठाकुरः मार्गसुधारं, बससेवावृद्धिं, पधर- मण्डी- फोरलेन- प्रभावित-जन-हानिविषयं, ज्वालापुर- पीएचसी- भवननिर्माण-त्वरणं च अवदत्।जोगिन्द्रनगरविधायकः प्रकाश राणा मार्ग-उद्घाटनं, कर्मचारीनियोजनं, जल-विद्युत्-व्यवस्था-सुधारं च याचितवान्।

**शिमला-जनपदस्य प्राथमिकताः**-मुख्यमंत्रीः विधायकेभ्यः अनुरोधं कृतवान् यत् ते स्व-विकासयोजनानां प्राथमिकताः शीघ्रं योजनाविभागाय समर्पयन्तु, येन ताः २०२६–२७ बजटे समावेशिताः स्युः। सः च चिट्टा- मुक्त- हिमाचल-अभियानस्य सफलतायै सक्रियसहयोगं याचितवान्।

रोहड़ू-विधायकः मोहनलाल ब्राक्टा एमआईएस- अन्तर्गत-सेब-क्रयवृद्ध्यै, दुग्ध-समर्थनमूल्यवृद्ध्यै मुख्यमन्त्रिणः धन्यवादं कृतवान्। सीमा- महाविद्यालये बीएड-कक्ष्याः, पेयजल-योजनानां शीघ्र-समापनं च याचितम्।

शिमलानगरविधायकः हरीश जनारथा नगरसम्पर्कमार्गाणां पृथक्-बजटं, पेयजलयोजनात्वरणं, भूमिगत- डक्टनिर्माणं, सौन्दर्यीकरण-योजनायाः प्रशंसां च अवदत्।

**काङ्ड़ा-जनपदस्य प्राथमिकताः** नूरपुरविधायकः रणबीर निक्का माता- शिशु-चिकित्सालय-निर्माणसमापनं, चिकित्सकपदपूर्तिं, अवैधखनन-निरोधं च याचितवान्।इन्दौराविधायकः मलेंद्र राजनः बाढ- प्रभावित- क्षतिपूर्तिं, तटीयकरण-कार्यं, शर्करा-नीतिं, प्रोत्साहनं, शर्करा-उद्योगस्थापनं च अवदत्। जसवां-परागपुर-विधायकः विक्रम सिंहः मार्ग- सीआरआईएफ- समावेशं, लोकनिर्माण- भवन- निर्माणत्वरणं, विद्युत्-सुदृढीकरणं च याचितवान्।ज्वालामुखीविधायकः संजय रतनः हेलिपोर्ट- निर्माणं, पॉलिटेक्निक/ आइटीआई- स्थापनं, चिकित्सालय-सुविधावृद्धिं, सेतु-निर्माण-समापनं च याचितवान्।अन्येऽपि विधायका विविध-मार्गनिर्माणं, स्वास्थ्य- शिक्षा- सुविधावृद्धिं, जल-योजनानां सुदृढीकरणं च अवदन्।राज्य-योजना-बोर्डस्य उपाध्यक्षः भवानीसिंह पठानिया विधायकेभ्यः स्वागतं कृत्वा एतादृशानां वार्षिक-प्राथमिकता-सभानाम् आयोजनं सशक्त- लोकतन्त्रस्य प्रमाणम् इति अवदत्।सभायां शिक्षामन्त्री रोहितठाकुरः, लोकनिर्माणमन्त्री विक्रमादित्यसिंहः, कृषिमन्त्री चौधरी चन्द्रकुमारः, आयुषमन्त्री यादविन्द्रगोमा, अन्ये वरिष्ठ-अधिकारिणः च उपस्थिताः आसन्।

# राज्यपालस्य अभिभाषणेन सह १६ फरवरी दिनाङ्कतः आरप्स्यते विधानसभायाः बजट-सत्रम्



हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेश-विधानसभायाः बजट-सत्रं प्रति शनिवासरे विधानसभा-सचिवालयेन अधिसूचना (Notification) निर्गता। अस्याः अधिसूचनायाः अनुसारं चतुर्दश-विधानसभायाः एकादशं सत्रं १६ फरवरी दिनाङ्के अपराह्णे २:०० वादने राज्यपालस्य अभिभाषणेन सह आरप्स्यते।

**सत्रस्य विवरणम्**विधानसभाध्यक्षः कुलदीप सिंह पठानिया महोदयः अस्य जानकारीं दत्तवान्। सः अवदत् यत् राज्यपालस्य संस्तुतेः (Recommendation) पश्चात् एषः निर्णयः स्वीकृतः। सत्रस्य प्रारम्भे राज्यपालस्य अभिभाषणं भविष्यति, तदनन्तरं शोकोद्गारः (Obituary references) तथा च विधायी-कार्याणि (Legislative business) भविष्यन्ति।

### विशेष-सत्रं न, साक्षात् बजट-सत्रमेव भविष्यति: मुख्यमन्त्री सुक्खुः

मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः स्पष्टीकृतवान् यत् विशेष-सत्रस्य विषये राज्यपालस्य परामर्शं सर्वकारेण स्वीकृतम्। अतः अधुना पृथक् विशेष-सत्रं न आयोजितं भूत्वा साक्षात् बजेट-सत्रमेव भविष्यति।

१. RDG चर्चाः बजट-सत्रे राजस्व-हानि-अनुदानस्य (RDG) स्थगनविषये विस्तृता चर्चा भविष्यति।

२. जनतायै सन्देशः - सः अवदत् यत् हिमाचलस्य जनता ज्ञातुं अर्हति यत् केन्द्रसर्वकारेण प्रदेशाय किं दत्तम्। ७२ वर्षाणां निरन्तरतापश्चात् एतत् अनुदानं स्थगितं जातम्, यत् चिन्तायाः विषयः अस्ति।

३. भाजपा-पक्षाय आह्वानम् - मुख्यमन्त्रिणा भाजपा-विधायकाः अनुरुद्धाः यत् ते सत्रे भागं स्वीकृत्य स्वपक्षं स्थापयन्तु। सः आरोपं कृतवान् यत् भाजपा-पक्षः सामाजिक-माध्यमेषु (Social Media) मिथ्या-प्रचारं करोति।

# काङ्गड़ा-विमानपत्तनस्य २३ वर्गकिलोमीटर- परमिते जलागमक्षेत्रे (Catchment Area) सुरक्षाचक्रं निर्मास्यते




हिमसंस्कृतवार्ताः- काङ्गड़ा।हिमाचलप्रदेशस्य पर्यटनस्य अर्थव्यवस्थायाः च भाग्यं परिवर्तयितुं काङ्गड़ा- विमानपत्तन- विस्तारीकरण- परियोजना अधुना धरातले अवतर्तुं सज्जा वर्तते। धावनमार्गस्य (Runway) विस्तारे प्राकृतिकबाधारूपायाः 'मांझी'-उपनद्याः उपरि अधुना ३८० मीटर दीर्घः आधुनिकः सेतुः निर्मास्यते। विभागः अस्य 'इञ्जीनियरिङ्ग- मास्टरपीस' इत्यस्य विस्तृत-परियोजना-प्रतिवेदनं (DPR) सज्जीकृत्य अन्तिम-अनुमोदनाय उच्चाधिकारिभ्यः प्रेषितवान्।

### वैज्ञानिक-सुरक्षा-कवचम्

सेतुं धावनमार्गं च वर्षाकालस्य प्रकोपात् रक्षितुं विभागेन एकं सुरक्षाकवचं निर्मितम् अस्ति। अस्य अन्तर्गतं २३ वर्गकिलोमीटर परिधौ विस्तृते जलागमक्षेत्रे (Catchment Area) विद्यमानाः सर्वे लघु-बृहत-नालाः वैज्ञानिकरीत्या सरलीकृताः (Channelized) भविष्यन्ति।येषु क्षेत्रेषु जलप्रवाहः तीव्रः भवति, तत्र 'चेक-डैम्स' (Check Dams) निर्मास्यन्ते, येन जलस्य वेगं नियन्त्र्य धावनमार्गः सुरक्षितः भवेत्। मुख्य-धावनमार्ग-सेतोः उभयतः द्वौ अतिरिक्तौ सेतू निर्मातुं प्रस्तावः अस्ति। एतौ सेवामार्गौ भविष्यतः, येन विमानपत्तनस्य कार्यैः सह स्थानीय- ग्रामवासिनां गमनागमने किमपि विघ्नं न भवेत्।अस्याः परियोजनायाः पूर्णतया सह काङ्गड़ा- घाटीक्षेत्रे ए-३२० (A-320) सदृशानां बृहद्- विमानानाम् अवतरणस्य मार्गः प्रशस्तः भविष्यति। अनेन विस्तारेण न केवलं काङ्गड़ा-जनपदे, अपि तु सम्पूर्णे प्रदेशे पर्यटनक्षेत्रे क्रान्तिः आगमिष्यति। व्यापारस्य रोजगारस्य च नूतनावसरैः सह काङ्गड़ा- विमानपत्तनं प्रदेशस्य बृहत्तमं 'एयर-हब' भविष्यति। सम्प्रति प्रभावितानां परिवाराणां कृते क्षतिपूर्ति-वितरणस्य प्रक्रिया तीव्रगत्या प्रचलति। केवलं द्वयोः मुहालयोः कार्यं अवशिष्टम् अस्ति। धनराशि-प्राप्त्या सह एव वितरण-प्रक्रिया सम्पूर्णा भविष्यति। अन्यकार्याणां तांत्रिक-अनुमोदनं (Technical Clearance) लब्ध्वा एव निर्माणकार्यस्य निविदाप्रक्रिया (Tender Process) आरप्स्यते।

# परीक्षा-अराजकतायाः विरुद्धं ९ फरवरीतः नूतनविधानं प्रवृत्तं भविष्यति




हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशे परीक्षासु 'प्रश्नपत्र-रहस्योद्घाटं' (Paper Leak), वञ्चना (अनुकरणम्) तथा अन्यान्य-अनुचित-मार्गाणां रोधाय राज्यसर्वकारेण अधुना 'हिमाचलप्रदेश-सार्वजनिक-परीक्षा (अनुचित-साधन-निवारण) अधिनियम-२०२५' कानूनरूपेण प्रवर्तितः। एतद् विधानम् ९ फरवरी २०२६ दिनाङ्कतः प्रभावी भविष्यति। कार्मिकविभागस्य सचिव एम. सुधा देवी महोदया द्वारा एषा अधिसूचना निर्गता।

### विधानस्य प्रमुखाः प्रबन्धाः (Key Provisions)

**कठोरदण्डः** - अस्मिन् नियमे दोषारोपिणां कृते १० वर्षाणां कारावासः तथा च एककोटि-रूप्यकाणां (1 Crore) पर्यन्तं दण्डशुल्कस्य (Fine) प्रावधानं कृतम् अस्ति।

प्रत्याभूतिरहित-अपराधः (Non-Bailable) - प्रथमवारं एतादृशः नियमः निर्मितः यत्र 'प्रश्नपत्र-लीक' इत्येतत् अधुना 'प्रत्याभूतिरहितः' अपराधः (Non-bailable offence) जातः।

**कार्यक्षेत्रम्** :- हमीरपुर-चयन-आयोगः (HPRCA) तथा शिमला-लोकसेवा-आयोगः (HPPSC) अस्य परिधौ स्तः। यदि कोऽपि 'कम्प्यूटर-आधारित-परीक्षा' (CBT) संस्था अथवा 'आउटसोर्स-एजेन्सी' कार्यं करोति, सा अपि अस्य विधानस्य उत्तरदायी भविष्यति।

### एजेन्सी-पक्षे कठोर-कार्याचरणम्

१. संज्ञेय-अपराधः - प्रश्नपत्र-लीक-नकल-सम्बद्धाः अपराधाः 'संज्ञेय-अपराधाः' (Cognizable offence) इति मन्यन्ते।

२. सङ्घटित-वञ्चना (Organized Cheating):- सङ्घटित-वञ्चना-प्रकरणेषु दण्डः अतीव कठोरः भविष्यति।

३. प्रतिबन्धः (Ban):- यदि कोऽपि परीक्षा-सञ्चालन-संस्था (Agency) दोषी सिद्ध्यति, तर्हि तस्याः उपरि भारी-दण्डशुल्कं आरोपयिष्यते तथा च सा भविष्ये परीक्षा-कार्यात् वञ्चिता (Ban) भविष्यति।

४. पारदर्शितायाः प्रयासः - राज्यसर्वकारस्य मतमस्ति यत् एतेन नियमेन परीक्षासु पारदर्शिता, निष्पक्षता तथा विश्वसनीयता आगमिष्यति। राज्यपालस्य शिव प्रतापशुक्लमहोदयस्य सम्मत्या सह एषः अधिनियमः आधिकारिक-राजपत्रे (Gazette) अधिसूचितः जातः। एषः देशस्य कठोरतम-परीक्षा-निवारक-नियमेषु एकः मन्यते।

## हास्यकणिका

**भोजनस्य स्वादः**

**पत्नी-** भो स्वामिन्! अद्यतनं भोजनं कथम् अस्ति?

**पतिः-** (मौनं स्थित्वा भोजनं खादति)

**पत्नी-** किमर्थं न वदति? भोजनं स्वादु अस्ति वा न?

**पतिः-** यदि अहं वदामि "भोजनं सम्यक् अस्ति", तर्हि त्वं चिन्तयसि यत् अहं मिथ्या (असत्यं) वदामि। यदि अहं वदामि "भोजनं सम्यक् नास्ति", तर्हि त्वं युद्धं करिष्यसि। अतः "मौनं सर्वार्थसाधनम्"!



# सत्यभक्ताय केवलं पाण्डुरङ्गस्य दर्शनस्यैव आशा भवति - डॉ. दिनेशमहाराज रसाळः




**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे नागपुरम्।** कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य 'चन्द्रशाला' प्राङ्गणे प्रचलतः कीर्तनमहोत्सवस्य द्वितीये दिने (६.२.२६) भारतीयदर्शनशास्त्रस्य विद्वांसः, सावित्रीबाई फुले पुणे विश्वविद्यालयस्य प्राध्यापकाः च डॉ. दिनेशमहाराजरसाळ महोदयाः स्वकीर्तनं प्रस्तुतवन्तः।

## कार्यक्रमास्य मुख्यातिथयः सत्कारश्च

मञ्चे प्रमुखतिथिरूपेण रामटेक-नगरस्य ह. भ. प. पाण्डे गुरुजी महोदयाः उपस्थिताः आसन्, येषां रामटेक-विकासार्थं कृताय योगदानाय विश्वविद्यालयपक्षतः सत्कारः कृतः। अस्मिन् अवसरे प्रो. पराग जोशी, डॉ. जयवन्त चौधरी, कुलसचिवः डॉ. रोशन अलोने, प्रो. हरेकृष्ण अगस्ती तथा प्रो. कलापिनी अगस्ती च उपस्थिताः आसन्।

रसाळ महोदयेन सह आगतायाः मण्डल्याः (सङ्गीतकाराणां) अपि आयोजकैः गौरवेण सत्कारः कृतः।

## कीर्तनस्य विषयवस्तु : विठ्ठल-भक्तिः

कीर्तनस्य आरम्भः पारम्परिकपद्धत्या सरस्वती-पूजनेन 'हरिपाठानुष्ठानेन च अभवत्। डॉ. रसाळ महोदयेन सन्त-तुकाराम महाराजस्य 'मागणी' (प्रार्थना) प्रकरणस्य अभङ्गस्य उपरि व्याख्यानं कृतम्: "आवडे हे रूप गोजिरे सगुण। पाहता लोचन सुखावले॥ आता दृष्टीपुढे ऐसाचि तु राहे। जो मी तुज पाहे पांडुरंगा॥"

**भक्तेः व्याकुलता चः** रसाळ महोदयः अवदत् यत् भक्तस्य एकमात्रं लक्ष्यं भगवतः मनोहररूपस्य दर्शनं भवति। यदा भक्तः भगवन्तं पश्यति, तदा तस्य नेत्रे तृप्ते भवतः।

माया-संसारस्य व्यवहारैः श्रान्तः जीवः केवलं विठ्ठलस्य नाम्नि दर्शने च सुखं प्राप्नोति।

भक्तस्य एतादृशीं व्याकुलतां रसाळ महोदयः तुकारामस्य एतैः शब्दैः वर्णितवान्— "जळावेगळी मासळी तैसा तुका तळमळी..." (यथा जलविहीना मत्स्यी व्याकुला भवति, तथा अहं तव दर्शनाय व्याकुलोऽस्मि)।

## भक्ति-शास्त्रयोः सङ्गमः

डॉ. रसाळ महोदयस्य कीर्तने सन्तसाहित्यस्य पाण्डित्यं, संस्कृतशास्त्राणां गाम्भीर्यं, वेदान्तविचाराः तथा वारकरी-परम्परायाः संस्काराः स्पष्टं दृश्यन्ते स्म। अस्मिन् कीर्तने भक्ति-अध्यात्म-शास्त्राणां अपूर्वः सङ्गमः आसीत्, येन सर्वे श्रोतारः भक्तिलोके लीनाः अभवन्।सामूहिक-आरत्या सह कार्यक्रमस्य समापनम् अभवत्। कार्यक्रमस्य सञ्चालनं डॉ. रेणुका करन्दीकर महोदया, आभारदर्शनं च प्रो. हरेकृष्ण अगस्ती महोदयेन कृतम्।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमो नमः नन्दिनि। अद्य बह्व्यः विचित्राः वार्ताः मया श्रुताः सन्ति।

**नन्दिनी-** सत्यम्। प्रथमतः सङ्ख्यानां कौतुकं दृश्यताम्। गतशुक्रवासरे २/६/२६ इति दिनाङ्कः आसीत्। एषः सममित-दिनाङ्कः (Symmetrical date) सर्वैः लक्षितः अस्ति।

**काव्या-** कालस्य अयं महिमा रमणीयः। परम् केवलं सङ्ख्या न, मानवानां स्वभावः अपि रमणीयः। एका फ्रान्स-देशीय-महिला अवादीत् यत् भारते या आत्मीयता दृश्यते, सा अन्यत्र नास्ति। तया भारत-फ्रान्स्-देशयोः तुलना कृता।

**नन्दिनी-** सा सुष्ठु अवादीत्। भारते तु अतिथयः देवाः इव पूज्यन्ते। परम् अत्र प्रेमणा सह धनस्य प्रदर्शनम् अपि भवति। एका विचित्रा वार्ता श्रुता यत् एकस्य वर्ष-वयस्कस्य शिशोः जन्मदिन- महोत्सवे तस्मै सुवर्णं, भूमिः, धनं च उपायन-रूपेण दत्तम् अस्ति।

**काव्या-** एतत् तु उत्तमम्। शिशोः भविष्यत् निश्चितम्। चीनदेशे एकस्मिन् विद्यालये बालानां कृते "प्रातः-नमनम्" अनिवार्यं कृतं अस्ति। तत्र छात्राः शिक्षकान् प्रति गभीरं नमन्ति। एतद् दृष्ट्वा केचन प्रसन्नाः, केचन च खिन्नाः जाताः सन्ति।

**नन्दिनी-** सत्यम्, अनुशासनस्य अतिरेकः अपि कष्टकरः। अद्यतन्यः वार्ताः समाप्ताः। धन्यवादः।



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# तत्त्वज्ञानम्

तत्त्वज्ञानम् इत्युक्ते स्वयम् आत्मना आत्मस्वरूपस्य प्रत्यक्षं दर्शनम्, भगवत्स्वरूपप्राप्तिः वा। भगवज्ज्ञानं परमगोप्यं, विज्ञानयुक्तं, भक्तिभावसमन्वितं चास्ति। भगवतः यावन्ति स्वरूपाणि स्युः, यादृशी सत्ता स्यात्, यावत् रूपगुणकर्मादिकं स्यात्, तत् तत्त्वभूतं ज्ञानं साधनमाध्यमेन ज्ञातुं योग्यमस्ति। सृष्टेः पूर्वं केवलं श्रीपरमेश्वरो हि आसीत्, तं विहाय स्थूलसूक्ष्मप्रकृत्यादिकं न किमपि आसीत्। सृष्टेः अनन्तरमपि स हि तिष्ठति। एतद् दृश्यमानं जगदपि तस्यैव स्वरूपं वर्तते। प्रलयकाले यत् अवशिष्यते, तदपि तस्यैव स्वरूपं स्यात्। यस्मात् कारणात् आत्मनि वास्तविकार्थो न स्यात् चेदपि तस्य प्रतीतिः भवति, एवम् अर्थस्य विद्यमाने सत्यपि तस्य प्रतीतिः न भवति, इत्येव भगवतो माया नाम। यथा अदृष्टवस्तौ अपि सत्तायाः आभासः भवति, एवमेव यथा पञ्चमहाभूतानि उच्चावचेषु भौतिकपदार्थेषु कार्यकारणभावेन प्रविष्टानि, अप्रविष्टानि च तिष्ठन्ति, तद्वत् परमेश्वरोऽपि तेषु भौतिकपदार्थेषु प्रविष्टत्वेन, अप्रविष्टत्वेन वा तिष्ठति। आत्मानः तत्त्वं जिज्ञासूनां कृते यत् जिज्ञास्यं स्यात्, तत् अन्वयव्यतिरेकरीत्या सर्वत्र, सदा च तिष्ठति, स हि आत्मा नाम। यदि मनुष्येण नियततया, एकाग्रमनसा च एतस्य अनुष्ठानं क्रियेत, तर्हि तस्मिन् न कदापि कर्तृत्वस्य अभिमानः उत्पद्यते, अपि तु आत्मसाक्षात्कारो जायते। मनुष्यजीवनस्य परमलक्ष्यं सांसारिकवस्तु न, अपि तु सांसारिकवस्तुतो विमुक्तिः। परमदिव्यस्वरूपस्य परमात्मनः प्राप्तिर्हि मनुष्यजीवनस्य अन्तिमं लक्ष्यमिति, शुभम्।

# हिमज्ञानप्रश्नोत्तरी

1. प्रश्नः सौरमण्डलस्य विशालतमः ग्रहः कः अस्ति?
उत्तर: बृहस्पतिः
2. प्रश्नःकः ग्रहः 'रक्तग्रहः' इति कथ्यते?
उत्तर: मङ्गलः
3. प्रश्नः पृथिव्याः एकमात्रः प्राकृतिकः उपग्रहः कः अस्ति?
उत्तर: चन्द्रः
4. प्रश्नः सूर्यस्य निकटतमः ग्रहः कः अस्ति?)
उत्तर: बुधः
5. प्रश्नः अन्तरिक्षं गच्छन् प्रथमः मानवः कः आसीत्?)
उत्तर: यूरी गागरिनः

# बालकथा- बाजीरावः पेशवा कृषकश्च



**शिक्षा: नम्रतायाः फलं सदैव शुभं भवति**

बाजीरावः पेशवा मराठा-सेनायाः प्रधानसेनापतिः आसीत्। एकदा सः अनेकयुद्धेषु विजयं प्राप्य स्वसेनया सह राजधानीं प्रति निवर्तते स्म। मार्गे सः मालवाप्रदेशे स्वसेनायाः शिबिरम् अस्थापयत्। सुदूरात् आगच्छन्तः तस्य सैनिकाः श्रान्ताः अभवन्। ते क्षुधया तृषया च व्याकुलाः आसन्, तेषां समीपे पर्याप्तं भोजनमपि नासीत्। बाजीरावः स्वस्य एकं सरदारं आहूय आदिष्टवान्, "त्वं शतसैनिकैः सह गच्छ, कस्यापि क्षेत्राद् शस्यं (फसलं) छित्वा शिबिरम् आनय।"सरदारः सैनिकदलेन सह ग्रामं प्रति प्रस्थितः। मार्गे सः एकं कृषकं अपश्यत्। सरदारः तम् अवदत्, "पश्य, त्वं मां अस्मिन् क्षेत्रे विशालतमं सस्यक्षेत्रं प्रति नय।" कृषकः तान् एकं विशालं क्षेत्रं प्रति अनयत्। सरदारः सैनिकान् आज्ञापितवान्, "सर्वं खाद्यान्नं कर्तय स्वगोणीषु च भरत।“ एतत् श्रुत्वा कृषकः चकितः अभवत्। सः हस्तौ बद्ध्वा अवदत्, "महाराज, भवान् एतस्य क्षेत्रस्य खद्यान्नं मा कर्तय। अहं भवन्तं अन्यत् क्षेत्रं प्रति नयामि। तत्र सस्यं पूर्णतया पक्वम् अस्ति।"सरदारः सैनिकाः च कृषकेन सह अन्यक्षेत्रं प्रति अगच्छन्। तत् क्षेत्रं किञ्चित् दूरे आसीत्, अतीव लघु च आसीत्। कृषकः अवदत्, "महाराज, भवन्तं यावत् खाद्यान्नं आवश्यकम्, एतस्मात् क्षेत्राद् गृह्णातु।"सरदारः कृषकस्य एतेन व्यवहारेण क्रुद्धः अभवत्। सः अपृच्छत्, "एतत् क्षेत्रं तु अतीव लघु अस्ति। तर्हि त्वं किमर्थं अस्मान् तस्मात् स्थानात् एतावत दूरे आनीतवान्?" कृषकः विनयेन उत्तरं दत्तवान्, "महाराज, मा क्रुध्यन्तु। तत् क्षेत्रं मम नासीत्। एतत् क्षेत्रं मम अस्ति। अतः अहं भवन्तम् अत्र आनीतवान्।कृषकस्य वचनेन सरदारस्य क्रोधः शान्तः अभवत्। सः धान्यं विना एव पेशवा-समीपं गतः। सः एतां वार्तां पेशवाय न्यवेदयत्। पेशवा स्वस्य दोषं ज्ञातवान्। सः सरदारेण सह स्वयं कृषकस्य क्षेत्रं गतः। सः कृषकाय तस्य खाद्यानस्य स्थाने प्रभूताः सुवर्णमुद्राः दत्तवान्, खाद्यान्नं च छित्वा शिबिरं प्रति नीतवान्।

# "परिपक्वता"

परिपक्वतायाः अर्थः अस्ति- यदा भवन्तः जगतः परिवर्तनं त्यक्त्वा स्वयमेव परिवर्तनम् आरभन्ते। परिपक्वतायाः अर्थः- जनान् यथावत् स्वीकुर्वन्ति। परिपक्वतायाः अर्थः- प्रत्येकं व्यक्तिः स्वस्थाने सम्यक् अस्ति इति भवन्तः अवगच्छन्ति। परिपक्वतायाः अर्थः- यदा भवन्तः ग्रहणात् अधिकं दातुं विश्वसन्ति। परिपक्वतायाः अर्थः- यदा भवतः सम्बन्धेभ्यः किमपि अपेक्षा नास्ति परन्तु त्यागस्य भावना स्वीकरोति। परिपक्वतायाः अर्थः- भवन्तः जानन्ति यत् भवतः आत्मिकसुखं किम् अस्ति। तथैव यदा त्वं आवश्यकतायाः तथा च लोभस्य भेदं अवगच्छसि। परिपक्वतायाः अर्थः- यदा त्वं कस्यचित् निष्पक्षभावेन प्रशंससि। अन्तिमतः अतीव महत्वपूर्णम्- "आन्तरिकसुखस्य सम्बन्धः भौतिक सुखेन सह न योज्यते।"

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**



# महात्मानारायणदासग्रोवर-महोदयस्य व्यक्तित्वं कृतित्वं च

**(जन्म15/11/1923-मृत्यु:06/02/2008)**

**✍डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी,भागलपुर बिहार**

भारतीयेतिहासे केचन महापुरुषाः तादृशाः सन्ति ये स्वकीयं सम्पूर्णं जीवनं राष्ट्रसेवायै, समाजोत्थानाय, शिक्षाप्रसाराय च समर्पितवन्तः। तेषु विशिष्टस्थानं धारयति महात्मा नारायणदासग्रोवरमहोदयः। एषः केवलमेकः शिक्षाविद् वा प्रशासकः नासीत्, अपि तु एकः महान् कर्मयोगी, त्यागशीलः समाजसेवकः, आर्यसमाजस्य निष्ठावान् अनुयायी, डीएवी आन्दोलनस्य अग्रदूतः च आसीत्। एतस्य व्यक्तित्वं कृतित्वं च भारतीयशिक्षाजगति, विशेषतः डीएवीपरम्परायां, स्वर्णाक्षरैः अंकितम् अस्ति। महात्मा नारायणदासग्रोवरमहोदयस्य जन्म एकस्मिन् सुसंस्कृते, धर्मनिष्ठे च परिवारे अभवत्। बाल्यकालात् एव एतस्य मनसि सत्यनिष्ठा, अनुशासनम्, सेवाभावना च दृढतया प्रतिष्ठिताः। मातापित्रोः संस्कारैः, आर्यसमाजस्य शिक्षाभिः च, एषः जीवनस्य लक्ष्यं समाजसेवा एव इति स्वीकृतवान्।
स्वामीदयानन्दसरस्वत्याः विचाराः वेदप्रामाण्यम्, सत्यं, तपः, सेवा च महात्मानारायणदासग्रोवरस्य जीवनस्य मूलाधाराः अभवन्। एषः आर्यसमाजस्य सिद्धान्तान् केवलं वचनेन न, अपि तु आचरणेन जीवन्तान् अकरोत्। वेदाध्ययनम्, यज्ञहवनपरम्परा, सामाजिकसुधारकार्याणि च एतस्य दिनचर्यायाः अङ्गानि आसन्। महात्मा नारायणदासग्रोवरमहोदयः डीएवी (Dayanand Anglo-Vedic) आन्दोलनस्य प्रमुखेषु अग्रदूतेषु एकः आसीत्। अस्य आन्दोलनस्य मुख्यं लक्ष्यम् आसीत् यत् वैदिकसंस्कृत्या सह आधुनिकशिक्षायाः समन्वयः। एषः इमम् आदर्शं स्वजीवने साकारं कृतवान्। एतस्य नेतृत्वे उत्तरपूर्वभारतस्य, बिहारझारखण्डक्षेत्रस्य च, डीएवीविद्यालयानां व्यापकः विस्तारः अभवत्। इतिहासे प्रसिद्धं यत् तस्य प्रेरणया, मार्गदर्शनेन च, प्रायः द्विशतानि पञ्चाशत् (250) डीएवी विद्यालयाः स्थापिताः। एते विद्यालयाः ग्रामीणनगरीयक्षेत्रेषु समानरूपेण शिक्षाज्योतिं प्रसारयन्ति स्म। महात्माग्रोवरस्य व्यक्तित्वस्य सर्वाधिकं प्रशंसनीयं पक्षः एतस्य अवैतनिकं निदेशककार्यकालम् आसीत्। एषः दीर्घकालं यावत् डीएवीविद्यालयव्यवस्थायां अवैतनिकरूपेण कार्यं कृतवान्। पद, प्रतिष्ठा, वेतनं वा कदापि एतस्य लक्ष्यं नासीत्। शिक्षा एव एतस्य साधना, सेवा एव एतस्य तपः आसीत्। महात्मानारायणदासग्रोवरमहोदयस्य व्यक्तित्वे केचन गुणाः विशेषतया द्रष्टव्याः—
1. सत्यनिष्ठा – एतस्य जीवनं पूर्णतया सत्याधारितम् आसीत्।
2. कर्तव्यपरायणता–स्वीकृतं कार्यं एषः पूर्णसमर्पणेन करोति स्म।
3. सेवाभावः – समाजहितमेव एतस्य चिन्तनस्य केन्द्रम् आसीत्।
4. सरलजीवनम् –एतस्य अत्यन्तसरलवेषः,जीवने न्यूनावश्यकताः, उच्चविचाराः च सर्वदा "सादा जीवन उच्च विचार" इत्यस्य सन्देशं ददाति स्म ।
5. अनुशासनम् – एषः स्वजीवने, कार्यक्षेत्रे, संस्थासु च सर्वदा अनुशासनस्य पालनं कृतवान् ।

एतेषां गुणानां कारणात् एव यत् जनाः एतं प्रेम्णा “झोलेवाले बाबाजी” इति सम्बोधयन्ति स्म। महात्मा ग्रोवरस्य कृतित्वस्य केन्द्रबिन्दुः शिक्षा एव आसीत्। एतस्य मतम् आसीत् यत्— “शिक्षा एव समाजपरिवर्तनस्य मूलसाधनम् अस्ति"।एतस्य प्रयासेन अनेके विद्यालयाः, महाविद्यालयाः च स्थापितानि। निर्धनविद्यार्थिभ्यः शिक्षासुलभता,चरित्रनिर्माणम्, राष्ट्रभावना च डीएवीशिक्षायाः प्रमुखलक्ष्याणि अभवन्।बिहार-झारखण्डक्षेत्रयोः महात्माग्रोवरस्य योगदानं विशेषतया उल्लेखनीयम् अस्ति । एतेन सुदूरग्रामेषु, आदिवासीक्षेत्रेषु, सामाजिकदृष्ट्या अविकसितप्रदेशेषु च डीएवीविद्यालयानां स्थापना कृता। एते विद्यालयाः तत्र निवसतां बालकानां जीवनदिशां परिवर्तितवन्तः।महात्माग्रोवरः कुशलप्रशासकः अपि आसीत्। एषः संस्थानां सुचारुरूपेण संचालनं, वित्तीयशुचिता, अनुशासनं, उत्तरदायित्वं च सुनिश्चितवान् ।डीएवीकॉलेज-प्रबन्धकर्त्री-समितेः (नवदिल्ली) उपाध्यक्षत्वेन अपि एषःमहत्त्वपूर्णभूमिकायाः निर्वहणं कृतवान्। शिक्षायाः अतिरिक्तं महात्माग्रोवरमहोदयः समाजसेवायां राष्ट्रसेवायां च सक्रियः आसीत्। दुर्भिक्षकाले, आपत्कालेषु, विपत्तिषु च, एषः विद्यालयानां माध्यमेन सहायताकल्पानाम् आयोजनं करोति स्म। एतस्य दृष्टौ विद्यार्थी एव भविष्यस्य नागरिकः अस्ति।
महात्मानारायणदासग्रोवरमहोदयस्य सम्पूर्णं जीवनं एकः आदर्शः ग्रन्थः इव आसीत्।एतस्य जीवनात् ज्ञायते यत् महान् भवितुं धनं, पदं, सत्ता वा आवश्यकं न, अपि तु शुद्धभावना, दृढसंकल्पः, निरन्तरसेवा च आवश्यकाः सन्ति।अतः स्पष्टं भवति यत् महात्मानारायणदासग्रोवरमहोदयः न केवलं डीएवीआन्दोलनस्य, अपि तु सम्पूर्णभारतीयशिक्षाजगतः एकम् अमूल्यं रत्नम् आसीत्। एतस्य व्यक्तित्वं कृतित्वं च अनन्तकालं यावत् शिक्षासेवानिष्ठानां कृते प्रेरणाप्रदं भविष्यति। वयं एतादृशस्य महापुरुषस्य चरणयोः प्रणामांजलिं समर्पयामः, यः स्वीयजीवनं राष्ट्राय, समाजाय, शिक्षायै च समर्पितवान्।